# Shri Rudrakotishvara Ashtakam

# શ્રીરુદ્રકોટીશ્વરાષ્ટકમ્

## Document Information

Text title : rudrakoTIshvarAShTakam

File name : rudrakoTIshvarAShTakam.itx

Category : aShTaka, shiva

Location : doc_shiva

Proofread by : Sivakumar Thyagarajan shivakumar24 at gmail, PSA Easwaran

Description-comments : Subrahmanya Stuti Manjari, Mahaperiaval Trust

Acknowledge-Permission: Mahaperiaval Trust

Latest update : January 28, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 28, 2023

*sanskritdocuments.org*

Shri Rudrakotishvara Ashtakam

# શ્રીરુદ્રકોટીશ્વરાષ્ટકમ્

ૐ શ્રીગણેશાય નમઃ ।

ક્ષેત્રમ્ - તિરુક્કળુકુન્રમ્  Tirukkazhukundram, TN

વ્યોમાનિલાનલજલાચલચન્દ્રસૂર્ય-
    ચૈતન્યકલ્પિતશરીરવિરાજિતાય ।
ઋગ્વાદિ વેદગિરિશૃઙ્ગનિકેતનાય
    શ્રીરુદ્રકોટિનિલયાય નમઃશિવાય ॥ ૧॥

કર્પૂરશઙ્ખધવલાકૃતિચન્દ્રકાન્ત-
    મુક્તાફલસ્પટિકવહ્નિપવિગ્રહાય ।
કસ્તૂરિકુઙ્કુમહિમામ્બુવિલેપનાય
    શ્રીરુદ્રકોટિનિલયાય નમઃશિવાય ॥ ૨॥

સૌન્દર્યનાયકિમુખામ્બુજભૃઙ્ગભૂત
    ચન્દ્રાર્કવહ્નિનિલયાય સદાશિવાય ।
અણિમાદિદાય કરુણામૃતસાગરાય
    શ્રીરુદ્રકોટિનિલયાય નમઃશિવાય ॥ ૩॥

ગઙ્ગાજલાગ્રનિલયાય કલામયાય
    કામાન્ધકત્રિપુરદગ્ધવિલેપનાય ।
ગઙ્ગાધરાય ગરુડધ્વજસેવિતાય
    શ્રીરુદ્રકોટિનિલયાય નમઃશિવાય ॥ ૪॥

ગૃધ્રાચલેન્દ્રનિલયાય નિરીશ્વરાય
    તત્ત્વાદિ સિદ્ધસુપૂજિતવન્દિતાય ।
સિદ્ધાદિ યોગપુરુષાય દિગમ્બરાય
    શ્રીરુદ્રકોટિનિલયાય નમઃશિવાય ॥ ૫॥

પઞ્ચાક્ષરાય ભવસાગરતારણાય

પઞ્ચાસ્યચર્મવસનાય પરાત્પરાય ।
પઞ્ચાક્ષરાય નિગમાચલનાયકાય
શ્રીરુદ્રકોટિનિલયાય નમઃશિવાય ॥ ૬॥

વેદાન્તમુખ્યવિભવાય નિરીશ્વરાય
વેદાન્તવેદ્યસરસાય વિચક્ષણાય ।
વેદાય વેદદુર્ગાય વિક્ષાયનાય
શ્રીરુદ્રકોટિનિલયાય નમઃશિવાય ॥ ૭॥

આધારશક્તિકુટિલાસનપઞ્ચકાય
બ્રહ્માણ્ડકલ્પિતકલામયવિગ્રહાય ।
પ્રાસાદ ષોડશકલામય વિશ્વમૂર્તિ
શ્રીરુદ્રકોટિનિલયાય નમઃશિવાય ॥ ૮॥

ઇતિ શ્રીરુદ્રકોટીશ્વરાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by Sivakumar Thyagarajan shivakumar24 at gmail.com,
PSA Easwaran

*Shri Rudrakotishvara Ashtakam*
pdf was typeset on January 28, 2023

Please send corrections to *sanskrit@cheerful.com*